पञ्चविधत्वादकृतस्य षड्विधत्वादेकादशविधः । यथाह नारदः "एकादशविधः साक्षी शास्त्रे दृष्टो मनीषिभिः । कृतः पञ्चविधस्तेषां षड्विधोऽकृत उच्यते । लिखितः स्मारितश्चैव यदृच्छाभिज्ञ एव च । गूढश्चोत्तरसाक्षी च साक्षी पञ्चविधः कृतः" इति । पञ्चानामपि कात्यायनेन स्वरूपमभिहितम् "अर्थिना स्वयमानीतो यो लेख्ये सन्निवेश्यते । स साक्षी लिखितो नाम स्मारितः पत्रकादृते" इति । स्मारितः पत्रकादृते इत्यपि विवृतं तेनैव "यस्तु कार्य्यप्रसिद्ध्यर्थं दृष्ट्वा कार्य्यं पुनः पुनः । स्मार्य्यते ह्यर्थिना साक्षी स स्मारित इहोच्यते" दृष्ट्वेति दर्शयित्वेत्यन्तर्भावितण्यर्थम् । कार्य्यं व्यवहारपदं दर्शयित्वा प्रमापय्य कार्य्यप्रसिद्ध्यर्थं कालान्तरे व्यवहारनिर्णयसिद्ध्यर्थं पुनः पुनः स्मार्य्यते कार्य्यते च विस्मरणनिरासाय यः स स्मारितो नाम साक्षीत्यर्थः । यस्तु यदृच्छया प्रसङ्गादागतस्त्वमत्र साक्षी भवेति साक्षित्वेन निरूपितः स यदृच्छाभिज्ञः स्मारितस्यास्य च पत्रानारूढत्वेन साम्येऽपि स्वरूपभेदः स्पष्टोऽपि तेनैव विवृतः "प्रयोजनार्थमानीतः प्रसङ्गादागतश्च यः । द्वौ साक्षिणौ त्वलिखितौ पूर्वपक्षस्य साधकौ" । गूढमाह "अर्थिना स्वार्थसिद्ध्यर्थं प्रत्यर्थिवचनं स्फुटम् । यः श्राव्यते स्थितो गूढो गूढसाक्षी स उच्यत" इति । उत्तरसाक्षिस्वरूपमाह "साक्षिणामपि यः साक्ष्यमुपर्य्युपरि भाषते । श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञितः" इति । षड्विधस्याप्यकृतस्य भेदो नारदेनैव दर्शितः "ग्रामश्च प्राड्विवाकश्च राजा च व्यवहारिणाम् । कार्य्येष्वधिकृतो यः स्यादर्थिना प्रहितश्च यः । कुल्याः कुलविवादेषु विज्ञेयास्तेऽपि साक्षिणः" । प्राड्विवाकग्रहणं लेखकसभ्योपलक्षणम् "लेखकः प्राड्विवाकश्च सभ्याश्चैवानुपूर्वशः । नृपे पश्यति तत्कार्य्यं साक्षिणः समुदाहृताः" इति वचनात् । बृहस्पतिस्तु लेखितमधिकमादायैतानेव द्वादश साक्षिण आह "लिखितो लेखितो गूढः स्मारितः कुल्यदूतकौ । यादृच्छिकश्चोत्तरश्चैव कार्य्यमध्यगतोऽपरः । नृपोऽध्यक्षस्तथा ग्रामः साक्षी द्वादशधा स्मृतः" इति । तल्लक्षणान्यपि कानिचिद्विलक्षणानि कानिचित्पूर्वसंवादीन्याह स एव "प्रभेदमेषां वक्ष्यामि यथावदनुपूर्वशः । जातिनामाभिलिखितं येन स्वं पित्र्यमेव च । निवासश्च स विज्ञेयः साक्षी लिखितसंज्ञकः । अर्थिना च क्रियाभेदैस्तस्य कृत्वा ऋणादिकम् । प्रत्यक्षं लिख्यते यस्तु लेखितः स उदाहृतः । कुड्यव्यवहितो यस्तु श्राव्यते ऋणिभाषितम् । विनिह्नुते यथाभूतं गूढसाक्षी स कीर्त्तितः । आहूय यः कृतः साक्षी ऋणन्यासक्रियादिके । स्मार्य्यते यो मुहुश्चैव स्मारितः सोऽभिधीयते । विभागदाने विषये ज्ञातिर्यत्रोपदिश्यते । द्वयोः समानो धर्मज्ञः स कुल्यः परिकीर्त्तितः । अर्थिप्रत्यर्थिवचनं शृणुयात् प्रेषितस्तु यः । उभयोः सम्मतः साधुर्दूतकः स उदाहृतः । क्रियमाणे च कर्त्तव्ये यः कश्चित् स्वयमागतः । अत्र साक्षी त्वमस्माकमुक्तो(१) यादृच्छिकस्तु सः । यस्तु साक्षी दिशं गच्छन् मुमूर्षुर्वा यथाश्रुतम् । अन्यं संश्रावयेत्तन्तु विद्यादुत्तरसाक्षिणम् । साक्षिणामपि यः साक्ष्यमुपर्य्युपरि भाषते । श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञितः । उभाभ्यां यस्य विश्वस्तं कार्य्यं वापि निवेदितम् । गूढचारी स विज्ञेयः कार्य्यमध्यगतस्तथा । अर्थिप्रत्यर्थिनोर्वाक्यं यच्छ्रुतम्भूभृता स्वयम् । स एव तत्र साक्षी स्याद्विसंवादे द्वयोरपि । निर्णीते व्यवहारे तु पुनर्न्यायो यदा भवेत् । अध्यक्षः सभ्यसहितः साक्षी स्यात् तत्र नान्यथा । दूषितं घातितं यत्र सीमायान्तु समन्ततः । अकृतोऽपि भवेत्साक्षी ग्रामस्तत्र न संशयः" इति । लिखितलेखितयोः स्वपरलिखनमात्रभेदादेकादशद्वादशसंख्ययोरविरोधः । सर्व्वे च यथासम्भवं दृष्टश्रुतरूपद्विविधसाक्षिभेदा ज्ञेयाः । क्रियाभेदैर्व्यवहारप्रकारभेदैः, तस्य प्रत्यर्थिनः । ऋणादिकमित्यादिशब्दात् यथासम्भवं सर्व्वविवादपदनिदर्शनम् । कुड्यग्रहणं व्यवधायकोपलक्षणम् । विनिह्नुते इति भावे क्तः निह्नवे सम्भावित इति शेषः । उक्त(१) इत्युक्त इतीतिशब्दाध्याहारः । दिशं देशान्तरमन्यामित्यर्थः । उभाभ्यामर्थिप्रत्यर्थिभ्यां यस्य विश्वस्तं यदीयो विश्वासः कृत इति सम्बन्धसामान्यविवक्षया षष्ठी, भावे क्तं चाभ्युपेत्य व्याख्येयम् । गूढचारी कार्य्यमध्यगतश्चेत्येकस्यैव संज्ञाद्वयमिति द्वादशत्वाविरोधः । दूतग्रहणं लेखकस्यापि प्रदर्शनार्थं "दूतकः खटिकाग्रहादिति" बृहस्पतिवचनाद्ग्रामग्रहणमप्यकृतसाक्ष्युपलक्षणम् । येन योऽर्थः प्रमितस्तत्र साक्षित्वेन प्रागनिरूपितोऽपि पश्चात् साक्षित्वेन विज्ञायोपन्यस्तः दृष्टस्य सभायां साक्ष्यं दातुमर्हतीति फलितोऽर्थः । इतरथा वेतनादानादिषु लिखिताद्यसम्भवे साक्ष्यभावप्रसङ्गः । इदमेवाभिसन्धायाह मनुः "यत्रानिबद्धो-